निमित्तमात्रम्

चमू कृष्ण शास्त्री





CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृत भारती
नवदेहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निमित्तमात्रम्

चमू कृष्ण शास्त्री

संस्कृतभारती
नवदेहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशनम्
संस्कृतभारती
मातामन्दिरगली, झण्डेवालान
नवदेहली - ११० ०५५

© प्रकाशकस्य एव

प्रथममुद्रणम् २०११

प्रतिकृतयः १५०००

मुद्रण - ग्राफिक वर्ल्ड
१६५९, दखनी राय स्ट्रीट,
दरियागंज, नई दिल्ली-२

ISBN - 978-93-81160-21-3

NIMITTAMAATRAM

Collection of eloquent and motivational articles in Samskrit by Shri Chamu Krishna Shastry, on the experiences from World Samskrit Book Fair held in January 2011 at Bangalore.

Publisher - Samskrita Bharati, Mata Mandir Gali,
Jhandevalan, New Dlehi - 100055
Tel. & Fax - 011-23517689 /23543097
samskritabharatidelhi@yahoo.co.in

Pages - II + 38

First Print - March - 2011

Printed at : Graphic World, 1659, Dakhni Rai St., Daryaganj, N.D.-2

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

संस्कृतजगतः दिगन्तविस्तारः

सद्यः जनवरि ७ तः १० पर्यन्तम् (२०११ वर्षे) बेङ्गलूरुनगरे इदम्प्रथमतया प्रवृत्तायाः विश्वसंस्कृतपुस्तकमेलायाः अनन्तरं काचित् संस्कृतविदुषी, उक्तवती- ''विश्वसंस्कृतपुस्तकमेलाकार्यक्रमेण संस्कृतजगतः दिगन्तविस्तारः जातः'' इति। अपरः उक्तवान्- ''आहत्य कार्यक्रमः एतादृशः सर्जनात्मकः आसीत् यत् कार्यकर्तृणां कल्पनाविस्तारः जातः'' इति। संस्कृत-अकादमीनिदेशकः कश्चन उक्तवान् - ''महत्तमा उपलब्धिः नाम संस्कृतस्य, संस्कृताय वा, विपणिः (Market) सृष्टा'' इति। ''संस्कृतस्य विराड्रूपदर्शनं जातम्'' ''संस्कृतस्य विषये जनमानसे विद्यमानस्य सुप्तस्य संस्कृतानुरागस्य प्रकटप्रवाहं दृष्ट्वा नष्टजाड्याः अभवाम'' ''एषः कार्यक्रमः मम जीवनस्य दिक्परिवर्तनक्षणः'' ''मम जीवनस्य महत्त्वं मया इदानीम् अवगतम्''। पुस्तकमेलायां गृहीतभागानां जनानां कथनानि एतानि।

दशदेशेभ्यः, भारतस्य २६ राज्येभ्यः अष्टसहस्राधिकप्रतिनिधयः आगताः आसन् मेलां प्रति। तेषां सर्वेषां ४८ कल्याणमण्डपेषु वासव्यवस्था कल्पिता आसीत्। व्यवस्थाकार्ये सार्धैकसहस्राधिकाः स्वयंसेवकाः कार्यं कृतवन्तः। त्रिशताधिकानां नूतनपुस्तकानां लोकार्पणं जातम्। १२८ प्रकाशकाः आहत्य १५४ आपणान् स्थापितवन्तः। पुस्तकविक्रयणस्य आहत्य धनराशिः चतुष्कोट्यधिकरूप्यकमितः। प्रदर्शिनीं मेलां च द्रष्टुमागताः जनाः चतुर्लक्षाधिकाः। आहत्य व्ययः माकिं त्रिकोटिदशलक्षाधिकरूप्यकाणाम्।

सम्मेलनार्थम् आगतेषु प्रतिनिधिषु ४०% प्रतिनिधयः महिलाः आसन्। प्रतिनिधिषु विद्वांसः, छात्राः, संस्कृतानुरागिणः सर्वे आसन्। ६०% प्रतिनिधयः युवानः आसन्

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

इति अपरः विशेषः। सर्वे परस्परं सहजतया संस्कृतेन एव भाषन्ते स्म। सभामण्डपादीनां निर्माणकर्ता (Contractor) श्री अब्बास महोदयः निर्माणारम्भे सभामण्डपे ८००० असन्दाः स्थापनीयाः इत्युक्ते सति 'उद्घाटनासत्रानन्तरम् अर्धाधिकजनाः इतस्ततः गच्छन्ति। अतः उद्घाटनानन्तरं ४००० आसन्दान् निष्कासयामः' इति उक्तवान् आसीत्। परं वयं न अङ्गीकृतवन्तः। तृतीयदिने तेन उक्तम् - 'मम जीवने प्रथमवारं पश्यामि, एकोऽपि नरः सम्मेलनस्थानं त्यक्त्वा न गतवान्। अन्यत्र कुत्रापि एतद् दृश्यं द्रष्टुं न शक्यते' इति। आम्, तस्य कथनं पूर्णतः सत्यम् आसीत्। सर्वेऽपि प्रतिनिधयः सर्वेष्वपि सत्रेषु उपस्थिताः इति उक्तं चेत् अपर्याप्तं भवेत्। सर्वेऽपि सर्वेष्वपि सत्रेषु सत्रप्रारम्भात् पूर्वमेव सत्रस्थाने उपस्थाय सत्रान्तं तिष्ठन्ति स्म इति एषः कश्चन आश्चर्यकरः विषयः एव।

मेलास्थाने संस्कृतग्रामः महत् आकर्षणकेन्द्रम् आसीत्। प्रदर्शिन्याः अन्ते तथा च सभामण्डपसमीपे, आहत्य स्थानद्वये दानपात्रं स्थापितमासीत्। तत्र आगतः सर्वः अपि संस्कृतप्रचारकार्याय धनसमर्पणं कुर्यात्, सः समर्पणस्य संस्कारः तस्य भवेत् इति उद्देशः आसीत्। सार्धद्विलक्षाधिकरूप्यकाणि जनैः दानपात्रयोः समर्पितानि आसन्। मेलास्थाने आहत्य एकशताधिकाः संस्कृतमातृभाषिणः शिशवः बालाश्च आसन्। तेषां संस्कृतेन एव क्रियमाणं भाषणं, जल्पनं, रोदनं, क्रीडनम् एकैकमपि परितः विद्यमानेषु जनेषु महान्तम् आनन्दसञ्चारं कारयति स्म।

मेलास्थाने पुस्तकमेला ज्ञानगङ्गाप्रदर्शिनी इति द्वे पार्श्वे पार्श्वे अस्ताम्। पुस्तकक्रयणाय आगताः प्रदर्शिनीं पश्येयुः, प्रदर्शिनीं द्रष्टुमागताः पुस्तकानि क्रीणीयुः इति उद्देशः आसीत्। प्रदर्शिन्यां ISRO संस्थया भित्तिपत्राणि तथा च आर्यभट्टादिविविधोपग्रहाणां प्रतिकृतयः स्थापिताः आसन्। एवमेव IIT, CDAC, IIM इत्यादिसंस्थाभिः विविधानि फलकानि स्थापितानि। महाभारतयुद्धे प्रयुक्तानां विविधानां व्यूहानां रचना पुत्तलिकामाध्यमेन कृता आसीत्। संस्कृतच्छात्रैः निर्मितः तारालयः तावत् जनान् अन्यलोकमेव नयति स्म एव।

प्रतिदिनं सायंकाले सांस्कृतिककार्यक्रमाः ये आसन् ते तु विरललभ्याः आसन्। सुप्रसिद्धाः गायकाः श्री विद्याभूषणः, श्री राजेशकृष्णः, श्री एस्. पि. बालसुब्रह्मण्यः, श्री पद्मनाभः प्रतिदिनं जनान् अतोषयन्। एकस्मिन् दिने 'प्रभातकलाविदरु' इति संस्थाया अभिनीतं 'धर्मभूमिः' इति नाटकं प्रतिदृश्यं जनकरताडनं प्राप्नोत्। मेलातः नातिदूरे कुवेम्पुकलाक्षेत्रम् इत्यत्र आयोजिताः काव्यचित्रकार्यक्रमः, गरबारासनृत्यं,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

पुत्तलिकानाटकम्, इत्यादयः कार्यक्रमाः असाधाराणाः आसन्।

उत्तराखण्डः, देहली, राजस्थानम्, मध्यप्रदेशः, छत्तीसगढ़, कर्णाटकं चेति षण्णां राज्यानां शिक्षामन्त्रिणः सम्मेलनम् आगतवन्तः आसन्। ते सर्वेऽपि मञ्चे भाषमाणाः ''अग्रिमवर्षे इयं मेला अस्माकं राज्ये एव आयोजनीया'' इति साग्रहं वदन्ति स्म। सम्मेलनस्य तृतीयदिने चितेभ्यः ५० प्रतिनिधिभ्यः "Strategic Transformation of Samskrit Institutions" इति विषये Indian Institute of Management, Bangalore इत्यस्य प्राध्यापकेन प्रो. महादेवमहोदयेन या कार्यशाला सञ्चालिता सा अत्यद्भुता आसीत् इति प्रत्येकं भागभागिनः अभिप्रायः। इदानीं संस्कृतविश्वविद्यालयेभ्यः विभिन्नसंस्कृतसंस्थाभ्यः च तां कार्यशालां तेषाम् अध्यापकानां निमित्तं सञ्चालयितुम् साग्रहम् आह्वानानि आगतानि सन्ति।

मेलायाः चतुर्थे दिने संस्कृतपुस्तकप्रकाशनविषये काचित् सङ्गोष्ठी आसीत्। तत्र सर्वेषां प्रकाशकानां समानं कथनम् आसीत् यत् -

१. तैः अद्यपर्यन्तं दृष्टासु पुस्तकमेलासु एषा मेला सर्वोत्तमा इति। अन्ताराष्ट्रिय-पुस्तकमेलानाम् अपेक्षया अपि समीचीनतरा व्यवस्था अत्र आसीदिति च।
२. ''अस्माभिः न्यूनचिन्तनं कृत्वा न्यूनपुस्तकानि आनीतानि, आनीतं सर्वं द्वितीयदिने एव समाप्तम्'' इति।
३. प्रतिवर्षम् एषा मेला क्रियताम् इति।

संस्कृतपुस्तकप्रकाशकेषु चतुर्विधाः सन्ति -

१. वाणिज्यरूपेण संस्कृतपुस्तकप्रकाशकाः
२. शैक्षिकसंस्थानां प्रकाशनविभागाः
३. संस्कृत-संस्कृति-धार्मिक-सेवासंस्थाः
४. वैयक्तिकप्रकाशकाः (संस्कृतविद्वांसः) इति।

कुत्रापि पुस्तकमेला भवति चेत् चतुर्थविधप्रकाशकाः (वैयक्तिकप्रकाशकाः) आपणं स्वीकर्तुं न शक्नुवन्ति। अतः अत्र अस्माभिः तेभ्यः एव विशेषव्यवस्था कल्पिता आसीत्। यः कोऽपि विद्वान् स्वेन प्रकाशितानां पुस्तकानां प्रतिपुस्तकं ५ प्रतिकृतीः दद्यात्, तासां विक्रयणे जाते पुनः ५ दद्यात्, अन्ते धनम्, अवशिष्टपुस्तकानि च स्वीकुर्यात् इति। तस्मिन् आपणे एव आहत्य एकादशलक्षरूप्यकमूल्यकानां पुस्तकानां विक्रयणं जातम्। तत्र एकस्य विदुषः तु ६९ सहस्ररूप्यकमूल्यकानां पुस्तकानां विक्रयणं जातम् आसीत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जनानां संस्कृतपुस्तकक्रयणाकाङ्क्षा एतादृशी सुमहती आसीत् यत् प्रातः ९ वादनतः रात्रौ ९ पर्यन्तम् आदिनं मेलायां प्रवेष्टुमेव कष्टं भवति स्म, पङ्क्तौ स्थातव्यं भवति स्म। बेङ्गलूरुनगरस्य अत्यन्तं प्रतिष्ठिताः जनाः विविधक्षेत्राणां प्रमुखाः, अधिकारिणः, राजनीतिज्ञाः, शासकाः, मठाधिपतयः, वैज्ञानिकाः, न्यायमूर्तयः, उद्योगपतयः सर्वेऽपि अनुपङ्क्तौ स्थित्वा पुस्तकक्रयणाय गच्छन्ति स्म। अहो जनानां संस्कृतप्रेम!

षण्णां राज्यानां सर्वकारैः पुस्तकमेलागन्तृभ्यः शिक्षकेभ्यः कार्यनिमित्तविरामाः दत्ताः आसन्। मध्यप्रदेशशासनेन गन्तृभ्यः रेलयाने विशेषशकट-(special coach) व्यवस्था कल्पिता असीत्। छत्तीसगढ़सर्वकारेण शिक्षकेभ्यः मार्गव्ययोऽपि दत्तः।

कश्चन पत्रकारः उक्तवान् - ''एतद् किञ्चन कार्यक्रमस्थानं यत्र कार्यकर्तृणां मुखे किञ्चिदपि 'tension' न दृश्यते।'' एकः आरक्षकाधिकारी उक्तवान् - ''गतचतुर्षु दिनेषु अस्माकं किमपि कार्यमेव नासीत्। सर्वाणि कार्याणि एतैः स्वयंसेवकैः एव क्रियमाणानि सन्ति।'' प्रबन्धव्यवस्थायां कृतकार्यः कश्चन ज्येष्ठः उक्तवान् -''अन्यसम्मेलनैः सह एतस्य तोलनं करोमि चेत् अत्रत्यं किञ्चन वैशिष्ट्यं नाम प्रतिनिधिषु १८ तः ४० वयस्तरीयाः जनाः एव अधिकाः, अतः आगामिवर्षदशकानि संस्कृतस्यैव।''

दशसहस्रजनानां भोजनव्यवस्था एकत्र एव आसीत्। स्वादिष्टानि तानि खाद्यानि यथेष्टं स्वीकर्तुं व्यवस्था आसीत्। नगरमध्येऽपि नारिकेलवने सा भोजनव्यवस्था आसीदिति कारणतः सर्वे तत्र इष्टमित्रैः सह यथेच्छम् उपविश्य वनभोजनस्य आनन्दम् अनुभूतवन्तः। भोजनस्थालिका पूगीफलपर्णनिर्मिता, चषकाः च कागदनिर्मिताः इति एवं सर्वमपि परिसरप्रदूषणरहितम् आसीत्। प्रतिनिधिभ्यः आहारपरिवेषणव्यवस्था ६ दिनानि अपि २४ घण्टाः अपि अर्थात् १४४ घण्टाः अपि निरन्तरं सज्जा आसीत्। १४ संख्याकानि पेषणयन्त्राणि (grinders) प्रतिदिनं २२ घण्टाः प्रचलन्ति स्म। एकस्मिन् दिने प्रातः अल्पाहाराय 'दोसा' व्यवस्था असीत्, सर्वेभ्यः अपि उष्णम् उष्णं दोसा एव परिविष्टा! आहत्य ३०,००० दोसाः परिविष्टाः तथापि एकापि दोसा दोषयुक्ता नासीत्।

सम्भाषणसन्देशस्य फेब्रवरीमासस्य अङ्कस्य सम्पादकीयस्य 'लोचनैः वञ्चिताः ते' इति सम्पादकीयस्य कश्चन भागः अत्र उल्लेखार्हः - ''पुस्तकमेलायाः अङ्गतया वेदिकासु गण्याः बहवः आसन् एव। एतदतिरिक्ते दृश्यम् अत्र आसन् गण्याः अपि

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

अनल्पाः। विशेषनिमन्त्रणम् अनपेक्षमाणाः, एतं कार्यक्रमं स्वीयमेव भावयन्तः ते स्वयम् उपस्थाय सर्वं प्रत्यक्षं दृष्ट्वा आश्चर्यं तृप्तिं च अनुभूतवन्तः। पञ्चसु अपि दिनेषु जनसागरः निरन्तरम् आगच्छन् आसीत् मेलां प्रति।''

''जनानाम् एतादृशः स्पन्दः द्रढयति यत् संस्कृतविषये जनतायाम् अनुरागः आधिक्येन अस्ति अद्यापि इति। एषः अनुरागः न केवलं बेङ्गलूरुनगरे, अपि तु समग्रे देशे अपि अस्ति एव। तस्य अभिव्यक्तये अवसरः यदि प्राप्येत तर्हि अपूर्वशक्तिं प्राप्य स च अभिव्यक्तः भवेत् एव। अतः संस्कृतज्ञैः अस्माभिः सर्वैः चिन्तनीयं यत् जनानां हृदयेषु निहितस्य अनुरागस्य अभिव्यक्तये अस्माभिः कीदृशाः कार्यक्रमाः स्वीकरणीयाः इति। प्रायः रूढिगतः मार्गः अस्माभिः परिवर्तनीयः भवेत्। जनानां रुचिं समयोपलब्धिं च मनसि निधाय कार्यक्रमाः चिन्तनीयाः भवेयुः। कार्यक्रमेषु आकर्षकाः अंशाः अवश्यम् अन्तर्भूताः स्युः।''

मेलायाः अनन्तरं संस्कृतभारत्याः अखिलभारतीयः अध्यक्षः षडशीतिवर्षीयतरुणः, ज्ञानवृद्धः, त्यागधनः, तपस्वी च मान्यः कृ. सूर्यनारायणरावः साश्रु सगद्गदं च वदति स्म - ''संस्कृतेतिहासस्य नूतनाध्यायः आरब्धः ..... संस्कृतस्य सुवर्णकालः समारब्धः .....।''

अधिकविवरणार्थं दृश्यताम्
www.samskritbookfair.org

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निमित्तमात्रम्

अद्यावधि यदा वयं संस्कृतकार्यार्थं देशे सर्वत्र प्रवासं कुर्मः स्म तदा स्थाने स्थाने विद्यमानाः संस्कृतानुरागिणः पृच्छन्ति स्म "संस्कृतपुस्तकानि कुत्र लभ्यन्ते" इति। अध्यापकाः वदन्ति स्म यत् तेषां विद्यालयस्य ग्रन्थालयाय ते संस्कृतपुस्तकानि क्रेतुम् इच्छन्ति, परं समीपे कुत्राऽपि नोपलभ्यन्ते इति। तथैव संस्कृतपुस्तकप्रकाशकानाम् अपि कथनं श्रूयते स्म "क्रेतारः न सन्ति" "सर्वः अपि संस्कृतज्ञः उपायनीकृतं पुस्तकं स्वीकरोति, न तु क्रीणाति" इत्यादि। अतः दशाधिकवर्षेभ्यः संस्कृतभारत्याः कार्यकर्तृणां मनसि संस्कृतपुस्तकमेलायाः कल्पना तदा तदा आगच्छति स्म एव। केचन कार्यकर्तारः बहूनि वर्षाणि यावत् संस्कृतपुस्तकमेलायाः स्वप्नं दृष्टवन्तः चेत् विश्वसंस्कृतपुस्तकमेलायां कार्यं कृतवतां तथा च मेलां दृष्टवतां बहूनां जनानां मेलानन्तरं बहूनि दिनानि यावत् रात्रौ स्वप्नेषु मेलादृश्यानि एव आगच्छन्ति स्म इति एषः कश्चन संयोगविशेषः एव।

संस्कृतभारत्याः प्रारम्भसङ्कल्पनायामेव आसीत् यत् संस्कृतप्रचारकार्यं किञ्चन जनान्दोलनं भवेत्, किञ्च संस्कृतसम्बद्धाः सर्वाः व्यक्तयः संस्थाः च मिलित्वा कार्यं कुर्युः इति। अतः संस्कृतभारत्याः कार्यारम्भानन्तरम् ऐषमः त्रिंशत्तमे वर्षे सर्वेषां कार्यकर्तृणां मनसि "तादृशः कश्चित् कार्यक्रमः करणीयः येन युगपत् बहवः परिणामाः साधिताः स्युः" इति विचारः प्रवर्तते स्म। तया पृष्ठभूम्या विश्वसंस्कृतपुस्तकमेला निश्चिता। कार्यक्रमस्वरूपनिर्णयात् पूर्वम् उद्देशाः स्पष्टाः आसन्। ते यथा -

१. सर्वाणि संस्कृतपुस्तकानि क्रयणार्थम् एकत्र लभ्येरन्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. संस्कृतस्य आधुनिकसाहित्यनिर्माणाय गतिप्रदानं करणीयम्।

३. संस्कृतविदुषां लेखनप्रकाशनकार्ययोः प्रोत्साहनं भवेत्।

४. संस्कृतपुस्तकानां 'विपणिः' (Market) स्रष्टव्या।

५. देशस्य पाण्डुलिपिसम्पदः विषये जागर्तिः भवेत्। ते च पाण्डुलिपिग्रन्थाः प्रकाशमानेयाः।

६. संस्कृतज्ञेषु आत्मविश्वास-उत्सह-प्रेरणा-निर्माणं भवेत्।

७. संस्कृतप्रचाराय संस्कृतसम्बद्धानां सर्वासां संस्थानाम् एकत्रागमनं सामूहिकप्रयत्नः च भवेदिति।

एवं कार्यक्रमेण के परिणामाः साधनीयाः इति प्रथमं विचिन्त्य तदनुसारं कार्यक्रमस्वरूपनिर्धारणं कृतं, न तु कश्चन कार्यक्रमः करणीयः इति एतदर्थं कार्यक्रमः कृतः। इदानीं पुस्तकमेलायाः अनन्तरं वयं यदि आत्मावलोकनं कुर्मः तर्हि उपरितनेषु सप्तसु अपि अंशेषु किञ्चित् किञ्चित् साधितम् इति वक्तुं शक्नुमः।

कार्यक्रमस्य स्वरूपनिर्धारणम् अनया रीत्या कृतम्। १) जनानां पुस्तकतृषां पूरयितुं पुस्तकमेला। २) पुस्तकमेलाम् आगताः जनाः संस्कृतज्ञानजगतः परिचयं, महत्त्वम्, उपयोगितां च जानीयुः इत्येदर्थं काचित् संस्कृतप्रदर्शिनी भवेत्। ३) एतादृशम् अपूर्वं कार्यक्रमं देशस्य सर्वे संस्कृतविद्वांसः, कार्यकर्तारः च पश्येयुः इत्येदर्थम् अखिलभारतीयं संस्कृतसम्मेलनम्। ४) मेलार्थं, प्रदर्शिन्यर्थं च बहवः जनाः आगच्छेयुः इति जनाकर्षणाय विविधाः मनोरञ्जनकार्यक्रमाः पूर्वभाविकार्यक्रमाः च इति एवं सम्पूर्णस्य कार्यक्रमस्य चत्वारः आयामाः निश्चिताः।

तथ्याधारिताः निर्णयाः

त्रिंशद्वर्षेभ्यः पूर्वं कार्यस्य प्रारम्भः बेङ्गलूरुनगरे अभवत् इति भावनानामाधारेण पुस्तकमेलास्थानं बेङ्गलूरु इति न निश्चितम्। अपि तु वस्तुस्थितेः, तथ्यानाम् (Facts) अध्ययनं कृत्वा स्थाननिश्चयः कृतः।

यथा-

१. बेङ्गलूरुनगरे पुस्तकानां क्रयणं कृत्वा पठनस्य प्रवृत्तिः जनानम् अस्ति।

२. IT जनाः बहवः सन्ति, तेषां हस्ते धनं भवति (पुस्तकक्रयणाय)।

३. त्रिंशद्वर्षेषु तत्र अस्माभिः कृतस्य कार्यस्य पुण्यं लाभाय भवति।

४. बहवः संस्कृतविद्यालयाः संस्कृतानुवर्तसंस्थाः च सन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. सर्वेष्वपि विद्यालयेषु महाविद्यालयेषु च अधिकांशच्छात्राः संस्कृतमपि पठन्ति।

६. पूर्वभाविरूपेण संभाषणशिबिरचालनाय शिक्षकाः लभ्यन्ते।

७. कार्यव्यवस्थां कर्तुं संस्कृतभाषिणः स्वयंसेवकाः पर्याप्तसंख्यया लभ्यन्ते।

८. बेङ्गलूरुनगरं बहुभाषाभाषिनगरम्, अतः तत्र संस्कृतानुकूल्यम् अधिकम्।

९. राज्यसर्वकारः संस्कृतानुकूलः।

१०. सुखदं हितदं च वायुमण्डलम्

इत्येतैः कारणैः बेङ्गलूरु इति स्थाननिश्चयः जातः। डिसम्बर अन्ते क्रिसमस्विरामः भवति, अतः तदा क्रियताम् इति केषाञ्चन विचारः आसीत्। परं मासान्ते जनानां हस्ते धनं न भवति, किञ्च जनवरिमासे चेत् पुष्यमासः इति कारणतः विवाहादीनामभावकारणतः प्रतिनिधीनां निवासव्यवस्थां कल्पयितुं कल्याणमण्डपाः लभ्यन्ते इति जनवरि ७ तः १० पर्यन्तमिति निर्णयः कृतः।

कठिनं कार्यं प्रथमम्

किञ्चित् लक्ष्यं साधयितुं यदा कतिचन कार्याणि करणीयानि भवन्ति तदा जनानां सामान्या प्रवृत्तिः नाम सरलानि कार्याणि प्रथमं कुर्वन्ति, कठिनं कार्यम् अन्ते करणाय स्थापयन्ति। परन्तु अत्र अस्माभिः 'यत्तदग्रे विषमिव' इति गीताश्लोकानुसारं कठिनानि कार्याणि प्रथमं करणीयानि सरलानि अनन्तरम् इति निश्चित्य, कार्यक्रमस्य सम्पूर्णसङ्कल्पनायाः चित्रनिर्माणं, सर्वासां संस्थानां सहभागस्य निश्चितिः, राष्ट्रियमार्गदर्शकसमितेः घटनम्, मेलास्थानप्राप्तिः, अपेक्षितस्य त्रिकोट्यधिकरूप्यकाणां सङ्ग्रहः, वासव्यवस्थार्थं पञ्चचत्वारिंशदधिककल्याणमण्डपानामारक्षणं, प्रकाशकसङ्ग्रहः, प्रतिनिधिसङ्ग्रहः, सम्भाषणशिबिराभियानं, सहस्राधिक-स्वयंसेवकसङ्ग्रहः भोजनव्यवस्था, अतिथिनिश्चयः, प्रदर्शिनीसज्जता, प्रचारः इत्यादिरूपेण काठिन्यानुगुणं आद्यताक्रमविभागः चिन्तितः। एतेन एव 'परिणामे अमृतोपमम्' इति अनुपमः परिणामः अभवत्।

लघुषु अंशेषु अवधानम्

सामान्यतः कार्यकरणसमये कार्ययोजनासमये वा 'किं किं करणीयम्' इति सूचीनिर्माणं कृत्वा तद् पुनः 'केन करणीयम्' इति व्यक्तिनिश्चयं कृत्वा तस्मै कार्यं सूच्यते। तद् योग्यमेव। परन्तु 'कथं करणीयम्' इति विषये गाढं चिन्तनं न भवति। अत्र पुस्तकमेलासन्दर्भे कथं करणीयमिति एतद्विषये आग्रहः आसीत्। पर्वूयोजना,

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

पूर्णयोजना, सूक्ष्मयोजना इति कार्ययोजनायाः भागत्रयम् आसीदेव। कथं करणीयम् इत्यनेन सह कथं न करणीयम् इत्यपि चिन्तितं येन प्रमादस्थानानां विषये जागरूकाः आस्म। उदाहरणार्थम् – प्रतिनिधिफलकस्य आकारः कः स्यात्, वर्णाः के स्युः, चित्रं किं स्यात्, तत्र कः सन्देशः दातव्यः इति एतद्विषये सप्ताहं यावत् चर्चाः प्रयोगाः च अभवन्। कर्णाटकराज्यं विहाय देशस्य सर्वेभ्यः राज्येभ्यः ये अष्टसहस्रं प्रतिनिधयः आगताः ते कदा, केन यानेन प्राप्नुवन्ति इति विषये ते पुनः ४८ स्थानेषु कुत्र के स्थापनीयाः इति विषये, ते रेलस्थानकतः कथम् आनेतव्याः, कथं प्रतिप्रापणीयाः चेति विषये संस्कृतभारत्याः कार्यकतृगणः पक्षं यावत् अहोरात्रं कार्यम् अकरोत्, एकैकस्यापि प्रान्तस्य सम्पूर्णविवरणप्राप्तिपर्यन्तं सम्पूर्णव्यवस्थापर्यन्तं चिन्तनम् अकरोत्।

सज्ञताकाले कार्यक्रमसमये च संस्कृतभारत्याः ज्येष्ठैः अत्यन्तं लघुषु अपि अंशेषु प्रतिदिनं निरन्तरम् अवधानं क्रियते स्म इति कारणतः १. सर्वपपि कार्यं सिद्धम् २. यथा भवेदिति आसीत् तथैव अभवत् ३. समये एव जातम् ४. न्यूनव्ययेन सम्पन्नम् ५. सुन्दरतमरूपेण सज्ञातम् इति एते पञ्च अंशाः – ये पञ्चापि अंशाः एकत्र एव विरलतया, कादाचित्कतया एव दृश्यन्ते – ते सर्वे पुस्तकमेलायां दृष्टाः।

कार्यकर्तृभ्यः कार्यवितरणं कृतं चेत् न पर्याप्तं, तद् कथं करणीयम् इत्यपि शिक्षणीयम्। लघुभिः अंशैः एव महतः निर्माणं भवति। लघुना लोपेनापि महती हानिः भवितुमर्हति। यथा अमेरिकादेशस्य कोलम्बिया इति महत्याः व्योमनौकायाः आवरणस्य लघु खण्डः निर्गतः इत्यस्मात् कारणात् प्रत्यागमनसमये व्योमनौका भस्मीभूता अभवत्। लघुवाक्यं किञ्चित् आजीवनं प्रेरणां दद्यात्। लघुपरिष्कारः कश्चन सौन्दर्यं दशगुणं वर्धयेत्। लघुबिन्दुः कश्चन छिन्नं रेखाद्वयं योजयेत्। अतः कथं करणीयम् इति कार्यशिक्षणसमये प्रत्येकं लघुमपि अंशं शिक्षयेम।

व्यूहरचना

निर्दिष्टं सीमितं समयबद्धं च लक्ष्यं साधयितुं या योजना क्रियते सा व्यूहरचना (Strategy) इति कथ्यते। पुस्तकमेलासन्दर्भे बहव्यः व्यूहरचनाः कृताः आसन्।

संस्कृतस्य वर्तमानं चित्रं तु कर्मकाण्डसम्बद्धम् इति, मन्दिरादिषु उपमुज्यमानम् इति च अस्ति। संस्कृतस्य किञ्चित् पुस्तकं प्रकाशनीयं चेत् तत्र मुखपुटे कस्यचन वयोवृद्धस्य श्वेतश्मश्रुलस्य जटाधारिणः मुनेः चित्रं स्थापयन्ति। वार्तापत्रेषु पत्रिकासु वा संस्कृतस्य विषये लेखनप्रकाशनसमये वैदिकच्छात्राणां चित्रमेव स्थापयन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतद् संस्कृतस्य अद्यतनं "Brand Image". एतद् समीचनं वा असमीचनं वा इति अत्र प्रश्नः न। परं तेनैकेन एव भवितव्यं किम्? 'प्राचीनम्' इति एतन्मात्रं चित्रं लोकचित्ताकर्षणाय पर्याप्तं न भवेत्। संस्कृतम् अद्यतनं, विज्ञानस्य भाषा, भविष्यतः भाषा च इति चित्रनिर्माणम् अपेक्षितम्। तदर्थमेव पुस्तकमेलासन्दर्भे -

१. संस्कृतवाङ्मये विज्ञानं तन्त्रज्ञानं च इति विषये विशाला प्रदर्शिनी आयोजिता यस्यां च प्रदर्शिन्यां २x३ फीट-गात्रस्य पञ्चशताधिकानि भित्तिपत्राणि, यन्त्राणि च स्थापितानि आसन्। प्रदर्शिनी तादृशी प्रभावकारिणी आसीत् यत् तत्र प्रविष्टः कश्चन जनः बहिरागमनसमये विचारैः भिन्नः एव जनः भवति स्म, अनन्तरदिने केचन स्वकुटुम्बजनान् आनयन्ति स्म, केचन गृहं गत्वा चित्रग्राहिणीम् आनीय चित्रग्रहणं कुर्वन्ति स्म, केचन टिप्पणिपुस्तकम् आनीय लिखन्ति स्म च।

२. एकस्मिन् दिने सायं संस्कृतभाषया अपि Fusion Music कथं भवेदिति प्रसिद्धचलच्चित्रगायकस्य द्वारा प्रदर्शितं यच्च युवभ्यः बहु अरोचत।

संस्कृतस्य महत्त्वम् उपयोगितां च संस्कृतज्ञाः एव प्रतिपादयन्ति चेत् समाजे न तथा प्रभावः भवति। यदि संस्कृतेतरजनाः संस्कृतस्य स्तुतिं कुर्युः, आवश्यकतां वर्णयेयुः च तर्हि उत्तमम् इति संस्कृतज्ञानां भाषणानि न्यूनानि एव स्थापयित्वा इतरेषां प्रतिष्ठितजनानां भाषणानि अधिकानि स्थापितानि। प्रदर्शिन्यामपि ISRO, IIT, IIM, CDAC इत्यादिसंस्थानां सहभागः कारितः। एतस्यापि महान् कश्चन परिणामः जातः।

सामान्यतः संस्कृतसम्मेलनेषु कार्यद्वयमेव भवति इति, तन्नाम १. संस्कृतप्रशंसा, २. व्यक्तिप्रशंसा इति, आक्षेपः अस्ति। अत्र तद् यथा न भवेत्, किञ्च यथा चर्वितचर्वणं न भवेत् तथा कर्तुं सर्वेभ्यः वक्तृभ्यः, आहत्य उपपञ्चाशत्वक्तृभ्यः, भाषणविषयः अपि पूर्वमेव सूचितः, कियत्कालं भाषणीयम् इति सूचितं, किं न भाषणीयम् इत्यपि सूचितम्।

वस्तुतः व्यूहरचनासम्बन्धे उपरि यथा त्रीणि उदाहरणानि दत्तानि तथा असंख्यानि उदाहरणानि सन्ति, यानि एतस्मिन् मेलाप्रसङ्गे एव कृतानि।

नवप्रयोगाः विद्युज्ज्वनकाः इव

आरम्भतः अपि संस्कृतभारत्याः किञ्चन वैशिष्ट्यं नाम नित्यं नवप्रयोगाय प्रयत्नः इति। कल्पकता, सर्जनशीलता, नव्यता च सततम् अन्विष्टाः। नूतनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्यक्रमः करणीयः अथवा कार्यक्रमः नूतनप्रकारेण करणीयः इति द्वयोः अन्यतरः भवेत् इति प्रतिपदं चिन्त्यते स्म।

इदानीमेव प्रथमवारं प्रयोगाः अभवन् इति तादृशानां नवप्रयोगाणां सूची क्रियते चेत् सा दीर्घा भवेत् यथा - १. पुस्तकमेला, २. प्रदर्शिन्याः अन्ते दानपात्रम्, ३. पुस्तकोद्घाटनेन मेलायाः, सम्मेलनस्य च उद्घाटनम्, ४. Electronic-Display माध्यमेन पुस्तकलोकार्पणम्, ५. गानगोष्ठ्यः, ६. FM Radio, TV, वार्तापत्रादिषु सप्ताहं यावत् विज्ञापनाः, ७. संस्कृतग्रामस्य प्रात्यक्षिकम्, ८. महिलायुवा-शिक्षाविज्ञानादिसम्मेलनानि, ९. प्रकाशनविषयिका संगोष्ठी, १०. Strategic Transformation of Samskrit Institutions इति विषये कार्यशाला इत्यादयः।

कस्मिन्नपि संघटने, कार्ये, आन्दोलने वा नवप्रयोगाः शरीरे नवजीवकोषोत्पत्तिः इव कार्यं कुर्वन्ति। तेन एव संघटनशरीरं वर्धमानं तिष्ठति। नवप्रयोगाः एव नवोत्साहं, नवकल्पनां, नवचेतनां च उत्पाद्य विद्युज्जनकाः इव कार्यं कृत्वा संघटने नवचैतन्यनिर्माणं कुर्वन्ति, कार्यवेगोत्कर्षं जनयन्ति च।

तन्त्रज्ञानस्य उपयोगः

पूर्वं तावत् कार्यक्रमस्य यशस्वितायै कार्यकर्तारः, धनं, कार्यपद्धतिश्चेति त्रीणि कारणानि इति वदन्ति स्म। परन्तु अद्यत्वे तन्त्रज्ञानम् (Technology) चतुर्थं महत् कारणम्। अत्याधुनिकस्य तन्त्राज्ञानस्य कार्ये योजनम् (Adaptation of the latest technology) इत्ययं महत्त्वभूतः विषयः।

www.samskritbookfair.org इति जालपुटं निर्माय तन्माध्यमेन प्रचारः, आपणानाम् आरक्षणम् इत्यादिकार्यं सरलतया, शीघ्रतया, निर्दुष्टतया च कर्तुं शक्ताः अभवाम। सभामण्डपे LED WALL नामकस्य 12' x 8' गात्रस्य बृहतः Screen द्वारा मञ्चीयः कार्यक्रमः आकर्षकरूपेण प्रदर्श्यते स्म।

उत्तरोत्तरकार्यक्रमचिन्तनम्

चतुर्षु सांस्कृतिककार्यक्रमेषु दिनत्रयात्मके सम्मेलने नवसु सत्रेषु अष्टसु गानगोष्ठीषु, प्रकटकार्यक्रमे, कार्यशालाद्वये च सर्वमपि समये आरब्धं, समये एव समाप्तम्। एतावत् सुव्यवस्थितं कथं जातम् इति सर्वस्य अपि भागभागिनः आश्चर्यम् आसीत्। तस्य रहस्यम् एतद् अस्ति - कार्यक्रमसमितेः गणत्रयम् आसीत्। प्रथमः गणः प्रतिसत्रम् अतिथीन् समयात् पूर्वमेव मञ्चसमीपे आनयति स्म। द्वितीयः गणः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्तमानसत्रस्य व्यवस्थां सञ्चालनं च करोति स्म। तृतीयः गणः तावत् अग्रिमसत्रस्य सज्जतां करोति स्म। एवम् प्रतिसत्रम् उत्तरोत्तरकार्यक्रमचिन्तनं भवति स्म इति हेतोः सर्वं समये सम्पन्नम्।

कार्यानुसारं शक्तिवर्धनम्

सामान्यतया वयं सर्वदैव अस्माकं शक्त्यनुसारं कार्यचिन्तनं कुर्मः। परन्तु एतद्वारं वयं 'क्रीडानियमं' परिवर्तितवन्तः। शक्त्यनुसारं कार्यचिन्तनं न, कार्यानुसारं शक्तिवर्धनं कुर्याम इति। आदौ तु 'भव्यं चिन्तनीयम्' इति तत्त्वानुसारं बृहत् लक्ष्यं निश्चितवन्तः। सहजतया सर्वेषां कार्यकर्तृणां चिन्ता, संशयः, द्वितीयचिन्तनम्, उद्वेगः, भयं इत्यादिकं सर्वं भवति स्म। 'किमर्थं न शक्यते' इत्यस्य कारणानि उच्यन्ते स्म। परन्तु एकवारं यदा गणे सुदीर्घा चर्चा, निर्णयश्च जातः तत्पश्चात् प्रत्येकमपि गणसदस्यः शक्तिवर्धनमात्रं चिन्तितवान्, दैवमपि अनुकूलम् अभवत्।

प्रलोभनं न, समर्पणम्

सामान्यतया अन्यत्र कार्यं यदा क्रियते, कार्यते वा, तदा जनानां धनस्य, कीर्त्याः, पदस्य, पदवृद्धेः, पुण्यप्राप्तेः वा यत्किञ्चित् प्रलोभनं भवति, प्रलोभनं दर्शयन्ति वा। परन्तु पुस्तकमेलार्थं कार्यकरणे न किञ्चिदपि प्रलोभनम् आसीत्। सर्वः अपि कर्तव्यबुद्ध्या (एतत्कार्यकरणं मम धर्मः इति) कार्यं कृतवान्। दशसहस्राधिकजनाः स्वयं प्रतिनिधिशुल्कं दत्त्वा, मार्गव्ययं स्वयं कृत्वा च सम्मेलनम् आगतवन्तः। सहस्राधिकस्वयंसेवकाः सप्ताहं यावत् अहोरात्रं समर्पणभावेन कार्यं कृतवन्तः। अतः कार्यक्रमः यशस्वी अभवत्।

समर्पणभावः सर्वदा Unconditional भवति, अपेक्षा / निरीक्षा कापि न भवति। 'राष्ट्राय स्वाहा, राष्ट्राय इदं न मम' इत्यत्र यथा अस्ति तथा 'न मम' इति स्वस्वामिभावं परित्यजति। ममत्वं विना समयसमर्पणं, श्रमसमर्पणं, प्रतिभासमर्पणं, वस्तुसमर्पणं, धनसमर्पणं च करोति। समर्पणयज्ञे समर्पणकर्तुः श्रद्धा केवलं भवति, न तु कापि व्यक्तिगता इच्छा, आशा वा। इच्छादीनाम् अभावतः दुःखक्रोधादीनाम् अभावः, तस्मादेव कार्यकर्तृणां समचित्तत्वं, समोत्साहित्वं च।

समर्पणं कथं श्रेष्ठं, कथं च तत् कार्यं करोति इति सूत्ररूपेण एवं वक्तुं शक्यते। जनानां संस्कृतप्रेम (Love for Samskrit) → सेवां कर्तुम् इच्छा (Willingness to serve) → समर्पणं (Dedication) → चित्तशुद्धिः (Purity of thought) → निस्स्वार्थेन अर्थात् पूर्णमनसा, पूर्णहृदयेन च कार्यकरणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(Selfless work and involvement of 'heart and soul') → समीचीनतरः परिणामः (Better result)।

वाणिज्यं न, बान्धव्यम्

विश्वसंस्कृतपुस्तकमेलाकार्यक्रमं वयं वाणिज्यरूपेण न कृतवन्तः, अपि तु विश्वसंस्कृतकुटुम्बबान्धव्यरूपेण साधितवन्तः। मेलाम् आगताः जनाः, सम्मेलनम् आगताः प्रतिनिधयः, प्रदर्शिनीं द्रष्टुम् आगताः छात्राः, मेलायाः आपणिकाः, निर्माणकार्ये संयुक्ताः कर्मकराः, द्रष्टुमागताः पत्रकाराः च सर्वे अपि तत् संस्कृतबान्धव्यम् अक्षिसात् कृतवन्तः। मेलायाः चतुर्थे दिने संस्कृतपुस्तकप्रकाशनविषयिका संगोष्ठी आसीत्। तस्यां गोष्ठ्यां कश्चन प्रकाशकः उक्तवान् – "अन्यत्र Book Fairs मध्ये आयोजकानां तथा च आपणिकानाम् अस्माकं मध्ये परस्परं कलहः भवति, अत्र कलहभावः एव न उत्पन्नः, अत्र वयमपि आयोजने भागभूताः इति अस्मासु भावः आगतः अस्ति, यतः अत्र वातावरणमेव तादृशमस्ति।"

आपणभाटकं साङ्केतिकं स्वल्पम् आसीत्। व्यवस्थाः सर्वाः कल्पिताः, यद्यद् प्रार्थितं सर्वं दत्तम्। प्रथमदिने जनसम्मर्दकारणेन यदा आपणिकाः भोजनाय गन्तुं न शक्नुवन्ति इति ज्ञातं तदा द्वितीयदिनतः तेभ्यः जल-चाय-भोजनादिकम् आयोजकैः आपणेषु एव आनीय प्रदत्तम्। तत्र कारणं सा कौटुम्बिकभावना एव।

सम्मेलनाय भारतस्य सर्वेभ्यः राज्येभ्यः सहस्राधिकस्थानेभ्यः दशसहस्राधिकप्रतिनिधयः आगतवन्तः। परं कस्यापि मनसि क्षणस्य कृतेऽपि प्रादेशिकभावः नैव आगतः। अपि तु सर्वदा सर्वस्यापि मनसि भारतभावैक्यमासीत्, विश्वबन्धुत्वमासीत्।

पवित्रं वायुमण्डलम्

यदा ध्येयं पवित्रं (शुद्धं, निस्स्वार्थं, स्वच्छं, निष्पापं), कार्यं पवित्रं, कार्यकर्तारः च पवित्रान्तःकरणाः भवन्ति तदा समग्रं वायुमण्डलं पवित्रं भवति, सर्वः व्यवहारः अपि निष्कल्मषः, निष्कलङ्कः च भवति। अतः एव मेलास्थाने आवासभोजनादिस्थाने वा दिनपञ्चकेपि या कापि असमीचीना घटना न प्रवृत्ता। लघुः अपि कलहः न प्रवृत्तः। दूरे शौचालयानां समीपे किञ्चन ATM Card पतितं प्राप्य शौचालयस्वच्छताकर्मकरः आनीय कार्यालये दत्तवान्। कस्यचन ३५००० रूप्यकाणां चित्रग्राहिणी कुत्रचिद् नष्टा इति यदा ध्वनिवर्धकेन घोषणा कृता तदा निमेषद्वयाभ्यन्तरे एव तां चित्रग्राहिणीं कश्चन आनीय दत्तवान्। मञ्चे उपवेशनाय आहूतानां गण्यजनानाम् उपवेशनाय अग्रिमपङ्क्तिषु काचित् विशेषव्यवस्था आसीत्। परं सूचनां विना कोऽपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्वान् तत्र गत्वा न उपविष्टवान्। बहवः महान्तः विद्वांसः, अन्येषु प्रसङ्गेषु तु मञ्चे वा अग्रपङ्क्तिषु वा उपवेष्टारः, अत्र सम्मेलने सामान्यजनः इव सामान्यप्रतिनिधिभिः सह सामान्यासन्देषु पृष्ठतः उपविष्टवन्तः, तदपि महता आनन्देन – तदपि एतदर्थम् अभवत् यत् तत्रत्यं वायुमण्डलं तादृशम् आसीत्।

पुस्तकमेलास्थानप्रवेशाय, प्रदर्शिनीदर्शनाय, भोजनाय च सहस्रशः जनाः युगपत् आगच्छन्ति स्म येन सम्मर्दः, अननुशासनं, परस्परं नोदनं च सहजम् अभविष्यत्, परन्तु अत्र तथा नाभवत्। सर्वे विना सूचनां, स्वयमेव अनुपङ्क्तिं कुर्वन्ति स्म – यतः तत्र परिसरे सर्वत्र पावित्र्यं सञ्चरति स्म।

तस्य परिणामः पत्रकारेषु अपि दृष्टः। महान् प्रचारः तैः दत्तः एव। परम् एकस्मिन् अपि वार्तापत्रे व्यङ्ग्यप्रचारः (Negetive publicity) न कृतः। सर्वः अपि परतया लिखितवान्, बहु सम्यक्तया लिखितवान् च।

कर्मण्येवाधिकारः

फलासक्त्या अभिभूतः अभूत्वा स्वस्य कर्ममात्रं चिन्तयन् कार्यं कुर्यात् इति गीतावाक्यं चरितार्थं कृतवन्तः सर्वे कार्यकर्तारः। अतः एव कार्यकरणसमये तेषां नैराश्यप्रसङ्गः नागतः। कार्येषु समये न जातेषु अपि, फले न प्राप्ते अपि कार्यकर्तुः मुखात् असन्तोषप्रकटनं नाभवत्। संस्कृतभारत्याः कार्यकर्तृभिः त्रिकोटिरूप्यकाणां सङ्ग्रहस्य दायित्वं स्वीकृत्य दशमासान् यावत् अटितम्। कर्णाटकसर्वकारस्य अनुदानप्राप्त्यर्थम् अष्टमासान् यावत् प्रतिदिनं सर्वकारीयकार्यालयाः गन्तव्याः भवन्ति स्म। तत्सम्बन्धे कर्णाटकज्ञानायोगस्य सचिवस्य टिप्पणी अत्र उल्लेखार्हा – 'भवतां कार्यकर्ता अत्र शतवारम् आगतः स्यात्, परन्तु कदापि, एकवारमपि, तस्य मुखात् अभाववाक्यम् / असन्तोषप्रकटकवाक्यं (Negetive talk) न श्रुतवान्' इति। साहित्यनिर्माणविभागे, मुद्रणविभागे, भोजनावासव्यवस्थाविभागे, सर्वेषु अपि विभागेषु सर्वे कार्यकर्तारः तथैव कर्मैकसक्ताः सन्तः कार्यं कृतवन्तः।

यद्यदाचरति श्रेष्ठः

अस्य कार्यक्रमस्य राष्ट्रियमार्गदर्शकसमितेः ये पदाधिकारिणः सदस्याः च आसन् तेषाम् आचरणं – मेलातः पूर्वं, मेलासमये च – सर्वेषां प्रेरणादायकम् आसीत्। 'मार्गदर्शकः' इति पदम् अन्वर्थकम् आसीत्। लघु उदाहरणं वक्तव्यं चेत् मार्गदर्शकसमितेः उपाध्यक्षेषु अन्यतमः पूर्वमुख्यनिर्वाचनायुक्तः श्री नी. गोपालस्वामी। सः चेन्नैवासी चेदपि मध्ये मध्ये बेङ्गलूरु आगत्य धनसङ्ग्रहाय कार्यकर्तृभिः सह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



CC-0. Nepal Sanskrit Academy, Kathmandu Collection



CC-0. Nepal Sanskrit Academy, Kathmandu Collection



CC-0. Nepal Sanskrit Academy, Kathmandu Collection



CC-0. Nepal Sanskrit Academy, Kathmandu Collection






CC-0. Nepal Sanskrit Academy. Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वयम् अटति स्म। मेलापूर्वदिनेषु रात्रौ प्रबन्धकगोष्ठीम् आगत्य सामान्यकार्यकर्ता इव उपविशति स्म। संस्कृतभारत्याः सर्वे ज्येष्ठाः एवमेव कार्यं कृतवन्तः।

निमित्तमात्रम्

विश्वसंस्कृतपुस्तकमेला सर्वेषां सहकारेण सहभागेन च अभवत्। कर्णाटकसर्वकारः, केन्द्रसर्वकारः, राष्ट्रियसंस्कृतसंस्थानं, सर्वे संस्कृतविश्वविद्यालयाः, विविधराज्यसर्वकाराः, विविधसंस्कृत-अकादमीजनाः, संस्कृतपुस्तकप्रकाशकाः इत्यादयः एते सर्वे अपि मेलायाः यशस्विनायै सम्पूर्णमनोयोगेन कार्यं कृतवन्तः। संस्कृतस्य उत्थानस्य समयः समागच्छन् अस्ति। भगवत्याः सुरसरस्वत्याः कार्यमिदम्। संस्कृतभारती निमित्तमात्रम्।

अधिकविवरणार्थं दृश्यताम्
www.samskritbookfair.org

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तकमेलातः पाठाः

कस्यचन कार्यक्रमस्य अनन्तरं तस्य के परिणामाः अभवन्, के लाभाः जाताः इति तु जनाः चिन्तयन्ति एव। परं कार्यकर्तारः वयं तस्य कार्यक्रमस्य कारणेन कान् कान् पाठान् पठितवन्तः इत्यपि चिन्तयेम। तथा सद्यः सम्पन्नायाः विश्वसंस्कृत-पुस्तकमेलायाः के पाठाः इति प्रकृतं विचारयाम।

संस्कृतसम्बद्धाः सर्वाः संस्थाः मिलित्वा संस्कृतकार्यं कुर्वन्ति चेत् कीदृशः अपूर्वः परिणामः भवेत् इति वयं बेङ्गलूरुनगरे दृष्टवन्तः। अतः अस्माभिः सर्वैः मिलित्वा कार्यं करणीयम् इति प्रथमः पाठः। विविधासु संस्थासु सतीषु, विविधेषु जनेषु वा सत्सु, सर्वैः सर्वदा मिलित्वा सम्भूय कार्यं करणीयम्। तेनैव अधिकं फलम्। यथा व्यक्तीनां गणकार्यं (Team Work) भवति, तथा संस्थानाम् अपि गणरूपेण कार्यकरणं स्यात्। तस्याः दिशि प्रथमसोपानरूपेण संस्कृतसम्बद्धानां सर्वासां संस्थानां 'Net-working' भवेत्। तदर्थम् उपायाः चिन्तनीयाः।

गणरूपेण कार्यं (Team Work) करणीयं चेत् तदर्थं काश्चन पूर्वावश्यकताः भवन्ति। केनापि गणसदस्येन स्वस्यैव पुरस्करणं (Self-projection) न कर्तव्यं, सर्वेषां पुरस्करणं करणीयम्। श्रमे कर्तव्ये अग्रेसरेण भवितव्यं, मञ्चे उपवेष्टव्ये पश्चात् गन्तव्यम्। त्यागे अहमहमिका, पुष्पमालासु उदासीनता, परेषां कीर्तनम्, आत्मनः विलोपनम्, कार्यं प्रधानं स्वस्य नामस्थानमानादिकं न, निर्णयानन्तरं तस्य क्रियान्वयनाय मनःपूर्वकः सम्पूर्णः सहयोगः इत्यादयः गुणाः अपेक्ष्यन्ते। विश्वसंस्कृतपुस्तकमेलायां सर्वैः संस्कृतविश्वविद्यालयैः, संस्कृत-अकादमीप्रभृतिभिः च तथैव व्यवहृतम्। राष्ट्रियसंस्कृतसंस्थानस्य आदर्शः अवलोक्यताम्। संस्थानेन सहस्राधिकाः छात्राः, शताधिकाः अध्यापकाः, शताधिकाः अन्ये विद्वांसः च तावतां

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

मार्गव्ययं प्रतिनिधिशुल्कं च दत्त्वा पुस्तकमेलार्थं प्रेषिताः। कविसम्मेलनं, शिक्षासम्मेलनं चेति सत्रद्वयस्य आयोजनार्थम् अपेक्षिता अर्थव्यवस्था, अन्यकार्याणि च कृतानि, पुस्तकापणेषु सशुल्कम् उपदशाः आपणाः स्वीकृताः। प्रयत्नं कृत्वा उपषष्टानि नूतनपुस्तकानि प्रकाशनाय सञ्जीकृतानि। कुलपतिना स्वयमपि मेलार्थं ग्रन्थाः रचिताः, अन्येऽपि तदर्थं प्रेरिताः च। अखिलभारतीयस्पर्धाः अपि मेलावसरे एव आयोजिताः, येन तत्र भागभागिनः अपि मेलां पश्येयुः इति। एतदतिरिक्ततया केन्द्रसर्वकारतः मेलार्थं दशलक्षं रूप्यकाणि दापितानि। परं राष्ट्रियसंस्कृतसंस्थानेन तत्पदाधिकारिभिः वा, कदापि, कुत्रापि, क्वचिदपि एतद्विषये उल्लेखोऽपि न कृतः। तादृशः भावः अपि नैव प्रदर्शितः। अतः एतस्मात् अस्माभिः ज्ञातव्यं तु - स्वस्य ख्यापनं न, अपितु संस्कृतस्य, ध्येयस्य, कार्यस्य च ख्यापनं करणीयम् इति। अयं द्वितीय पाठः।

मेलातः पूर्वं संस्कृतपुस्तकप्रकाशकाः वदन्ति स्म - "पुस्तकानां क्रेतारः न सन्ति" "संस्कृतज्ञाः Complementary पुस्तकं स्वीकुर्वन्ति, न तु धनं दत्त्वा क्रीणन्ति!" "संस्कृतपुस्तकानां कृते विपण्याः अभावः अस्ति" इत्यादिकम्। तथैव लोकाः वदन्ति स्म यत् वयं संस्कृतपुस्तकानि क्रेतुम् इच्छामः, परं समीपे न उपलभ्यन्ते, कुत्र लभ्यन्ते इत्यपि न जानीमः इति। संस्कृतशिक्षकाः, ग्रन्थपालाः, प्रधानाध्यापकाः च वदन्ति स्म यत् अस्माकं विद्यालयस्य ग्रन्थालयाय अन्यविषयाणां पुस्तकानां क्रयणाय अस्मन्नगरे एव पुस्तकानि उपलभ्यन्ते, परं संस्कृतपुस्तकानि न इति। वस्तुतः एषः 'अभाव' कश्चन महान् 'अवसरः' इति नैव दृष्टः। अतः सर्वे रोदनं कुर्वन्ति स्म। पुस्तकमेलातः तृतीयः पाठः नाम - अभावम् अवसरं मत्वा तदनुगुणः कार्योपायः चिन्तनीयः इति।

पुस्तकमेलायां चतुर्षु दिनेषु ४ कोटिरूप्यकाणां पुस्तकविक्रयणं जातम्। द्वितीयदिने एव अधिकांशप्रकाशकानां संङ्ग्रहः (stock) समाप्तः आसीत्। प्रातः नववादनतः रात्रौ नववारनपर्यन्तं तथा वाणिज्यं भवति स्म यत् भोजनाय, लघुशङ्कार्थं गमनाय वापि आपणिकस्य समयः न भवति स्म। अन्ते सर्वः अपि प्रकाशकः एकमेव अंशं वदति स्म - "इतः पूर्वं कस्याञ्चिदपि पुस्तकमेलायाम् एतादृशः जनसम्मर्दः न आसीत्। वयम् 'अल्पचिन्तनं' (under estimate) कृत्वा स्वल्पानि एव पुस्तकानि आनीतवन्तः। यदि अधिकानि आनीतवन्तः अभविष्याम तर्हि सर्वमपि विक्रीतम् अभविष्यत्" इति। वस्तुतः संस्कृतसम्बन्धे अस्माकं मनस्सु याः धारणाः सन्ति ताः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एव संस्कृतविकासपथे प्रथमः मार्गावरोधकः (road block) इति एषः चतुर्थः पाठः। न केवलं प्रकाशकाः, अपि तु संस्कृतसंस्थाप्रमुखाः, बहवः संस्कृतज्ञाः च पुस्तकमेलायाः विषये under estimate कृतवन्तः इति एतद् कथनमपि under statement एव इति कश्चन अवदत्।

केषां पुस्तकानाम् अधिकं विक्रयणम् अभवत् इति यदा सर्वेक्षणं कृतं तदा ज्ञातं – भाषाभ्यासाय उपयुज्यमानानां (learning material) पुस्तकानाम् अधिकं विक्रयणम् इति। तत्रापि कीदृशानाम् इति यदा विचारितं तदा ज्ञातं – सरलसंस्कृतमाध्यमेन संस्कृतपठनाय, सरलसंस्कृतमाध्यमेन व्याकरणकाव्यादीनां पठनाय च उपयोगिनां पुस्तकानाम् अत्यधिकं विक्रयणम् इति। पञ्चषेषु स्थानेषु संस्कृतभारत्याः आपणाः आसन्। केन्द्रीयापणे एव विंशत्यधिकलक्षरूप्यकाणां विक्रयणं जातम्। संस्कृतभारत्याः तु सर्वाणि अपि पुस्तकानि संस्कृतैकभाषया! (अपवादभूतानि कानिचन विहाय)। अतः पञ्चमः पाठः – जनाः तु संस्कृतमाध्यमेन संस्कृतं पठितुम् इच्छन्ति, न तु अन्यभाषामाध्यमेन। जनाः संस्कृतपुस्तकानि संस्कृतेन एव पठितुम् इच्छन्ति, न तु अन्यभाषाभिः अनूदितानि! अतः सरलसंस्कृतेन साहित्यं स्रष्टव्यम् इति।

पुस्तकमेलायाः अङ्गतया यत् सम्मेलनम् आयोजितम् आसीत् तत्र षण्णां राज्यानां शिक्षामन्त्रिणः भागं गृहीतवन्तः। प्रत्येकं राज्यस्य मन्त्री 'अग्रिमा मेला अस्माकं राज्ये आयोज्यतां, पूर्णः सहयोगः करिष्यते' इति उक्तवान्। यद्यपि अयं कश्चन महान् प्रेरकः विषयः, तथापि अस्माभिः सर्वादौ अवगन्तव्यं यत् बेङ्गलूरुपुस्तकमेला किमर्थं तावती प्रभावकारिणी, जनाकर्षिका च जाता, कथं तावन्तः जनाः आगताः इति। यद्यपि तत्र जनानां सुप्तः संस्कृतानुरागः, बेङ्गलूरुनगरवैशिष्ट्यानि कानिचन च कारणानि स्युः, तथापि अन्ये च केचन चिन्तनीयाः विचाराः सन्ति। जनानाम् आनयनाय तत्र कृताः प्रयत्नाः उल्लेखार्हाः।

१ मेलातः पूर्वं त्रिमासावधौ बेङ्गलूरुनगरे ६८० स्थानेषु दशदिनावधिकानि सम्भाषणशिबिराणि कृतानि, ते शिक्षार्थिनः मेलाविषये सूचिताः।

२. बेङ्गलूरुमहानगरं सप्ततिधा विभज्य प्रतिनगरम् एकः संयोजकः, चत्वारः कार्यकर्तारः इत्येतैः युक्तः पञ्चानां कश्चन गणः निर्मितः, ते ७० गणाः गृहसम्पर्कं कृत्वा आह्वानं कृतवन्तः।

३. संस्कृतशिक्षकाः द्विशताधिकविद्यालयानां प्राचार्याणां प्रबन्धकानां च सम्पर्कं कृत्वा प्रार्थितवन्तः यत् विद्यालयस्य सर्वे छात्राः अस्मिन् [illegible] परम्पराविषयिणीं

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

'ज्ञानगङ्गा' नाम्नीं प्रदर्शिनीं पुस्तकमेलां च द्रष्टुम् आगच्छेयुः इति। (तदनुगुणं विद्यालयेभ्यः लोकयानैः छात्राः समूहरूपेण आगताः।)

४. Professional Colleges नामकानां Engineering, Medical इत्यादीनां महाविद्यालयानाम् अध्यापकाः छात्राः च आहूताः।

५. प्रथमदिनद्वये प्रदर्शिनीं द्रष्टुं ये लक्षाधिकसङ्ख्याकाः छात्राः आगताः तेभ्यः सर्वेभ्यः एकं पत्रकं दत्तम्। तत् पत्रकं दृष्ट्वा तेषां छात्राणां पितरः अनन्तरदिनद्वये प्रदर्शिनीं द्रष्टुम् आगताः।

६. मासद्वयकालावधौ सहस्राधिकानि वस्त्रफलकानि, Flex , भित्तिपत्राणि च स्थापितानि, त्रिलक्षाधिकानि करपत्राणि वितीर्णानि च।

७. जनाः किमर्थं संस्कृतम् इच्छन्ति, किमर्थं संस्कृतं पठन्ति इति वैज्ञानिकम् अध्ययनं कृत्वा तदनुगुणं विज्ञापिकाः (Advertisements) सज्जीकृत्य मेलातः पूर्वं पञ्च दिनानि यावत् 'जनैः किमर्थं मेलां प्रति आगन्तव्यम्' इति विषयस्य आधारेण, मेलासमये कार्यक्रमविवरणं दत्त्वा च दैनिकवार्तापत्रेषु दूरदर्शनादिषु विज्ञापिकाः दत्ताः। Print media, Electronic Media, Hoardings, FM Radio, इत्यादिषु आहत्य सामान्यतः ३० लक्षरूप्यकाणां विज्ञापिकाः प्रकाशिताः प्रसारिताः च। एकेन TV Channel द्वारा LIVE प्रसारस्य व्यवस्था कृता। अन्य Channels मध्ये Panel discussion, वार्तापत्रेषु लेखाः च व्यवस्थापिताः।

८. मेलासमये पञ्च दिनानि यावत् प्रतिदिनं सायं विश्वविख्यातकलाकारैः सङ्गीतस्य, नाटकस्य च कार्यक्रमाः आयोजिताः, यान् द्रष्टुम् आगताः जनाः पुस्तकविपणिम् अपि गतवन्तः।

९. सम्मेलनस्य, मेलायाः, प्रदर्शिन्याः च उद्घाटनादीनां विवरणयुक्तस्य आमन्त्रणपत्रस्य ३० सहस्रं प्रतिकृतयः वितीर्णाः।

१०. Email माध्यमेन प्रचाराभियानं कृतम्।

११. विविधसामाजिकसङ्घटनानां सहयोगेन प्रचारः कृतः।

१२. कर्णाटकसर्वकारेण सर्वेभ्यः विद्यालयमहाविद्यालयेभ्यः मेलाप्रदर्शिनीदर्शनाय सूचनापत्रं प्रेषितम्।

१३. दक्षिणभारतस्य पञ्चभ्यः राज्येभ्यः प्रत्येकं स्थानतः जनाः 'संस्कृतप्रवास'रूपेण एकदिनाय मेलाम् आगच्छेयुः इति प्रयत्नः कृतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१४. वीथीनाटकानि, ध्वनिवर्धकप्रचारः इत्यादयः अपि चिन्तिताः।

१५. मेलायाः समीपे अनतिदूरे एव विविधाः सांस्कृतिककार्यक्रमाः आयोजिताः।

इत्येवंप्रकारेण बहवः प्रयत्नाः विहिताः। एतैः प्रयत्नैः अस्माकं पाठः कः? उत्तमां पूर्वयोजनां कुर्याम चेत्, व्यूहरचनां कुर्याम चेत्, परिश्रमं कुर्याम चेच्च प्रवाहरूपेण जनाः आगच्छेयुः, कार्यक्रमनिश्चयमात्रं न पर्याप्तं, जनानाम् आनयनाय अधिकम् अवधानम् अपि करणीयम् इत्येषः षष्ठः पाठः।

पुस्तकमेला, प्रदर्शिनी, सम्मेलनं, सांस्कृतिककार्यक्रमाः, भोजनवासादिव्यवस्थाः इति एताः सर्वाः अपि उत्तमाः आसन् इति मेलाम् आगतानां सर्वेषाम् अभिप्रायः। तत्र कारणं किम्? कार्यकर्तृणां यः 'श्रेष्ठतार्थम् आग्रहः' आसीत् सः एव प्रधानं कारणम्। सर्वस्मिन् अपि कार्ये गुणस्तरः सर्वश्रेष्ठः भवेत् इति प्रयत्नः आसीत्। मेलास्थानस्य निर्माणकार्यं बेङ्गलूरुनगरे प्रथमक्रमाङ्कवते निर्मात्रे, यद्यपि तस्य धानं/मूल्यम् इतरेभ्यः बहु अधिकं तथापि, श्रीमते अब्बासमहोदयाय प्रदत्तम्। प्रदर्शिनीसंस्कृतग्राम-सभामण्डपमञ्चादीनाम् अलङ्काराय बेङ्गलूरुनगरे विद्यमानेषु कलावित्सु सर्वश्रेष्ठः, चलच्चित्रनिर्देशकः, श्रीमान् शशिधर अडपमहोदयः एव योजितः, तत्कार्यार्थमेव पञ्चदशाधिकलक्षं रूप्यकाणि व्ययितानि। शौचालयाः स्वच्छाः स्युः इत्येतदर्थं मेलास्थाने प्रतिशौचालयं प्रतिदिनं ३००० रूप्यकाणि दत्त्वा ५० शौचालयाः ५ दिनानि यावत् व्यवस्थापिताः। कुत्रापि न्यूनता न भवेत्, मितव्ययः अपि भवेत्, परं गुणस्तरः अत्युत्कृष्टः भवेदिति एषः अस्माकं सप्तमः पाठः।

वयं यद्यद् कार्यं कुर्याम तद् सर्वम् अपि संस्कारकरं भवेत्, प्रेरणादायकं भवेत्, विचारप्रदं च भवेदिति अष्टमः पाठः। प्रतिनिधिफलकम् इति सामान्यः कश्चन विषयः। परं तदपि ध्येयबोधकं भवितुम् अर्हति। अद्यावधि गतेषु त्रिंशत्यां वर्षेषु 'संस्कृतेन भाषणं, संस्कृतेन पाठनम्' इति विषयद्वयं वयम् अधिकतया वदामः स्म। आन्दोलनस्य द्वितीयचरणस्य आरम्भकाले इदानीम् अस्माकं कार्यस्य अवधानकेन्द्रं 'संस्कृतेन लेखनं, संस्कृताय जीवनम्' इति। एतदंशद्वयं सर्वस्मिन् पदके लिखितम् आसीत्। यद्यपि प्रदर्शिनी भारतस्य वैज्ञानिकपरम्परायाः विषये आसीत्, तथापि मध्ये मध्ये कियन्ति उद्बोधकानि, प्रेरकाणि दृष्टिदायकानि च वाक्यानि लिखित्वा स्थापितान्यासन्!! मञ्चः, परिसरः, द्वाराणि इत्यादीनि सर्वाणि अपि प्राचीनपाण्डुलिपि-ग्रन्थानां ताडपत्राणि इव दृश्यमानानि। तानि अस्माकं पाण्डुलिपिग्रन्थसम्पदः विषये भावजागरणं कुर्वन्ति स्म। प्रतिसत्रम् आरम्भे गानगोष्ठीनाम्ना यानि गीतानि गीयन्ते

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

स्म तेषां पृष्ठतः काचित् चिन्तनसरणिः आसीत्। मञ्चे यः यः भाषणं कृतवान् तस्मै सर्वस्मै अपि किं वक्तव्यं, किं न वक्तव्यम्, कियत्कालं वक्तव्यम् इति विषयत्रये पूर्वसूचना दत्ता आसीत्। अतः चर्वितचर्वणं न अभवत्। स्वस्य प्रान्ते यः अग्रमान्यः आसीत् सोऽपि अत्र प्रतिनिधिः इव सर्वैः सह उपविश्य (VIP Treatment विना अपि) आनन्दम् अनुभूतवान्। मेलास्थानस्य भित्तयः अपि उद्बोधिकाः आसन्।

सर्वेषां संस्कृतज्ञानां कृते एतस्याः पुस्तकमेलायाः कारणेन अपरः कश्चन विशिष्टः, नवमश्च पाठः नाम 'सर्वसमावेशकता' इति। कार्ये सर्वेषां समावेशनं भवेत्। सर्वेभ्यः प्रतिनिधिभ्यः स्कन्धे स्थापनयोग्यः कश्चन स्यूतः दत्तः आसीत् (सः स्यूतः जैविककार्पासेन - Oraganic Cotton द्वारा निर्मितः!!)। - तस्मिन् लिखितम् आसीत् - 'संस्कृतं सर्वेषाम्, संस्कृतं सर्वत्र' इति। एषः घोषणाविषयः न, अपि तु आचरणविषयः। यदि इदानीं संस्कृतं सर्वेषां न स्यात् तर्हि सर्वेषां यथा स्यात् तथा करणीयम्। साङ्केतिकरूपेण दृष्टिदानाय वा अस्य विचारस्य क्रियान्वयनं सम्मेलने मञ्चे दर्शितम्। त्रिषु दिनेषु मञ्चे ये आसन् तेषु संस्कृतजगतः प्रमुखभूताः संस्कृतज्ञाः सर्वराज्यीयाः आसन् एव। तदतिरिच्य उद्योगपतयः, अधिकारिणः, मन्त्रिणः, कलाविदः, वैज्ञानिकाः, साहित्यकाराः, शासकाः, अर्थशास्त्रज्ञाः इत्येवं राष्ट्रजीवनस्य सर्वक्षेत्रसम्बद्धाः आसन्, सर्वराज्यीयाः आसन्, सर्वजातीयाः आसन्, सर्वमतसम्प्रदायसम्बद्धाः च आसन्। महिलासम्मेलनं, युवसम्मेलनं, विज्ञानसम्मेलनं, शिक्षासम्मेलनं, कविसम्मेलनम् चेति विषयवैविध्यम् अपि आसीत्। संस्कृतकविसम्मेलनस्य मुख्यातिथिः आसीत् कन्नडभाषायाः श्रेष्ठः दलितकविः कन्नडपुस्तकप्राधिकारस्य अध्यक्षः श्रीमान् सिद्धलिङ्गय्यमहोदयः। जातिप्रान्तमतपूजापद्धतिलघुवर्तुलेभ्यः अस्माभिः संस्कृतज्ञैः बहिः आगत्य अखिलभारतीयैः भवितव्यम् इत्येव एषः पाठः।

कासुचित् व्यवस्थासु न्यूनताः आसन् एव। परन्तु कोऽपि लेखकः असन्तोषं न प्रकटितवान्। बहुभिः गण्यमान्यैः मेलाप्रवेशाय अनुपङ्क्तौ स्थातव्यम् अभवत्। परं न कोऽपि नष्टसंयमः जातः। बहुभिः प्रमुखैः आमन्त्रणपत्रमेव न प्राप्तम्। किन्तु मन्दिरगमनविषये, भगवतः उत्सवस्य विषये च आमन्त्रणपत्रस्य अपेक्षा न करणीया इत्येताम् उक्तिं स्मरन्तः इव श्रद्धया तेऽपि कार्यक्रमम् अगतवन्तः। ज्येष्ठाः कनिष्ठाश्च, नूतनाः प्राचीनाश्च, विद्वांसः पामराश्च, महाधनाः अकिञ्चनाश्चेति सर्वे समानोत्साहिनः सन्तः समानाः सन्तः च भागभाजः अभवन्। एतत्सर्वं किं द्योतयति?

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri Collection

यदा निस्स्वार्थभूतं महत्तरं किञ्चन लक्ष्यं पुरतः भवेत् तदा दोषाः क्षाम्यन्ते, सह्यन्ते, न उल्लिख्यन्ते च इति। यत्र व्यक्तीनां स्थानमानादीनां विचारस्य गन्धः अपि न भवति तत्र सर्वे अपि सहजतया संस्कृतप्रधानचिन्तनम् एव कुर्वन्ति। कार्यकर्तृणां भागभागिनां च सर्वेषां मनः यदा पवित्रं, प्रेरकम्, उत्साहप्रदं च भवेत् तदा परितः सर्वमपि पवित्रं प्रेरकम् उत्साहप्रदं च भवति इति एषः दशमः पाठः

एतेन कार्यक्रमेण पठितैः पाठैः वयं यदि अस्मत्स्थाने संस्कृतसम्बद्धान् कार्यक्रमान् इतोऽपि परिणामकारिरूपेण कुर्याम, यथा करणीयं तथा कर्तुं यदि समर्थाः भवेम, यदि कार्यक्रमं बहुफलदं कुर्याम तर्हि इतः पाठान् पठितवन्तः इति चिन्तयितुं शक्येत। अतः पाठान् पठेम इत्येव पाठः।

अधिकविवरणार्थं दृश्यताम्
www.samskritbookfair.org

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रिंशति वर्षेषु त्रिंशत् उपलब्धयः

संस्कृतभारत्याः कार्यस्य प्रारम्भः १९८१ तमे वर्षे जूनमासे सञ्जातः। तदारभ्य एतेषु त्रिंशति वर्षेषु अस्माभिः किं किं साधितम् इति अवलोकनं क्रियते चेत् अस्माकम् उत्साहः विश्वासः च वर्धेत। तदर्थम् एषः प्रयासः। व्यक्तिजीवने त्रिंशतः वर्षाणां कालावधिः सुदीर्घः। परं सङ्घटनस्य जीवने एषः अवधिः अत्यल्पः, शैशवम् एव।

उपलब्धीनां विषये यदा चर्चा क्रियेत तदा कस्यां परिस्थितौ कार्यं प्राचलत्, केन उद्देशेन कया पद्धत्या च कार्यं कृतम्, देशकालपृष्ठभूम्यादयः काः, सम्बद्धाः जनाः के इत्यादयः अंशाः महत्त्वं भजन्ते। किञ्च, समाजे यत्किञ्चित् महत् परिवर्तनं यत् जायते तत् क्वचित् गतिशीलसमाजस्य सहजप्रक्रियारूपेण भवेत्। क्वचित् बहुकालतः वर्तमानायाः लोकाकाङ्क्षायाः परिणामरूपेण भवेत्, क्वचित् उद्यम-साहस-धैर्य-बुद्धि-शक्ति-पराक्रम-त्याग-समर्पण-जीवनदानैः साध्येत च। संस्कृतभारत्याः उपलब्धिषु उपरितनाः सर्वेऽपि अंशाः करणीभूताः।

अस्मिन् लेखे मुख्यभूताः एव उपलब्धयः उल्लिखिताः। परं प्रत्येकम् उपलब्धेः परिमाणं न दर्शितम्। किञ्च संस्कृतकार्यम् इदम् अनितरसाधारणं, विशिष्टम्, अनुपमं चेति हेतोः अन्येन केनापि कार्येण सह तोलयितुं न शक्यते।

१. भयनिवारणम्

संस्कृतेन सम्भाषणीयं चेत् शुद्धतया एव सम्भाषणीयं, दोषः नैव करणीयः इति विचारः यद्यपि योग्यः, अत्यन्तम् आवश्यकः च, तथापि भाषाप्रयोगम् अकृत्वा भाषाशुद्धतामात्रविषये अत्याग्रहः दर्शितः चेत्, सभासु भाषणमध्ये एव दोषप्रदर्शन-

CC-0. Nepal Sanskrit Academy. Mahabir Pun Collection

प्रवृत्तिः दर्शिता इति कारणतः च समग्रे देशे संस्कृतच्छात्राणां, संस्कृतशिक्षकाणां च मध्ये तादृशं भयवातावरणम् आसीत् यत् यः कोऽपि संस्कृतेन सम्भाषणाय मुखमेव न उद्घाटयति स्म। तेषु दिनेषु पददोषप्रदर्शनमेव पाण्डित्यलक्षणम् आसीत् इति कारणतः कश्चन अल्पज्ञः अपि दोषप्रदर्शनदुस्साहसं करोति स्म। कार्यारम्भानन्तरं दश वर्षाणि यावत् अस्माकं प्रत्येकं भाषणे कश्चन बिन्दुः भवति स्म – 'सदोषम् अदोषम् वा, धैर्येण भाषणं क्रियताम्' इति। सौभाग्येन इदानीं वातावरणं परिवृत्तम् अस्ति। तद् भयं अपगतं, सङ्कोचः नष्टः च। कार्याने यथा एक्सलरेटर् ब्रेक् इति द्वे भवतः, तथा भाषायामपि भाषणोत्साहः, शुद्धताचिन्तनं चेति एतदुभयं नितराम् आवश्यकम्। परं यानचालकेन कदा किं नोदनीयम् इति ज्ञातव्यं, तावदेव।

२. सम्भाषणम्

भाषानामककार्यानस्य श्रवण-भाषण-पठन-लेखनरूपेषु चतुर्षु चक्रेषु भाषणरूपस्य चक्रस्य रन्ध्रकारणात् वायुः निर्गतः आसीत्। तस्माच्च यानम् अग्रे न गच्छति स्म। (पंक्चर् असीत्) परं गतेषु त्रिंशति वर्षेषु लक्षाधिकानि सम्भाषणशिबिराणि जातानि इति कारणतः, विविधशैक्षिककार्यक्रमेषु कोट्यधिकाः जनाः संस्कृतसम्भाषणप्रयत्नं कृतवन्तः, कतिचन जनाः दैनन्दिनं व्यवहारं संस्कृतेन कुर्वन्ति इत्यस्माच्च संस्कृतज्ञानां मध्ये, संस्कृतच्छात्राणां मध्ये च संस्कृतेन सम्भाषणं नाम कश्चन सामान्यः स्वाभाविकश्च विषयः जातः। रेलपट्टिकाभ्यां बहिः गतं रेलशकटम् इव संस्कृतस्य स्थितिः आसीत्, परम् इदानीं श्रवणसम्भाषणपट्टिकयोः उपरि संस्कृतरथः समागतः अस्ति। अतः इतः परं द्रुतगत्या पुरोगमनं सुनिश्चितम्।

३. सरलसंस्कृतम्

आ भारतस्वातन्त्र्यवर्षात् संस्कृतभाषा भारतस्य राजभाषा भवेदिति सर्वेषां संस्कृतज्ञानाम् अभियाचना आसीत्। सा स्वीकृता न अभवत् इत्यत्र यद्यपि बहूनि कारणानि सन्ति, तथापि तत्र प्रमुखं कारणं तु नीतिनिर्धारकाणां सम्मुखे स्थितायाः भाषायाः स्वरूपम्। नायकानां सम्मुखे कीदृशं संस्कृतम् आसीत्? तदेव सन्धिसमासयुक्तम्, अनन्वितपदविन्यासोपेतं, दुरवगम्यं, गीतिकाव्यनाटकादिभाषासदृशं प्रौढं संस्कृतम्। भीताः ते संस्कृतं नैव समर्थितवन्तः। परम् इदानीम् उत्तराखण्डसर्वकारेण द्वितीयराजभाषा संस्कृतम् इति कथं घोषितम्? शासकाः संस्कृतभारतीकार्यकर्तृणां संस्कृतेन सरलसहजसम्भाषणं श्रुतवन्तः, सरलम् इति प्राप्तनिश्चयाः सन्तः घोषणमपि कृतवन्तः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदिदं सरलसंस्कृतं, न तु सरलीकृतं संस्कृतं, न तु अपाणिनीयं किञ्चित्।

यदि संस्कृतं सर्वजनग्राह्यं भवेत् इति अस्माकम् इच्छा स्यात्, यथा इतरभाषासु दैनिकपत्राणि प्रकाश्यन्ते तथा एव संस्कृतेन अपि काचित् दैनिकी भवेत् इति अस्माकम् अपेक्षा यदि स्यात्, तर्हि सम्भाषणसन्देशे यादृशेन सरलसंस्कृतेन लिख्यते तादृश्याः सरलतमभाषायाः प्रचारः करणीयः। सः अनिवार्यः।

४. संस्कृतमाध्यमेन पाठनम्

भारतं प्रति आङ्ग्लेयानाम् आगमनात् पूर्वं संस्कृतस्य संस्कृतमाध्यमेन एव पाठनं भवति स्म, न तु भाषानुवादेन। किं तत्र प्रमाणम्? इदमेव प्रमाणं यत् पाण्डुलिपिग्रन्थेषु संस्कृतकृतीनां संस्कृतव्याख्यानानि लभ्यन्ते, न तु भाषानुवादः।

संस्कृतभारत्याः सर्वेषां कार्यकर्तृणां प्रयत्नेन अद्य बहुषु राज्येषु विद्यालयीयशिक्षणे संस्कृतस्य संस्कृतमाध्यमेन पाठनं स्वीकृतम्, सहस्राधिकशिक्षकाः तथा संस्कृतमाध्यमेन पाठयन्ति च।

५. नवप्रयोगाः / कार्यक्रमाः

संस्कृतप्रचारक्षेत्रे संस्कृतभारत्या शताधिकाः विनूतनाः प्रयोगाः कृताः, येषां माध्यमेन जनसङ्ग्रहः, जनशिक्षणं, जनगणनिर्माणं च महता परिमाणेन अभवत्। सम्भाषणशिबिरं, संस्कृतसन्ध्या, शिबिरगुच्छः, संस्कृतसङ्गमः, वीथिनाटकं, क्रीडोत्सवः, चिन्तनचक्रम्, स्नेहमेलनम्, छात्रशिल्पशाला, भारतीपूजा, शिबिराभियानम् इत्यादिषु उपशतेषु कार्यक्रमेषु एकैकोऽपि कार्यक्रमः बहुफलदायी, सुदूरपरिणामकारी च।

६. संस्कृतप्रदर्शिनी

संस्कृतस्य व्यावहारिकमुखस्य परिचायिका प्रदर्शिनी, संस्कृतविज्ञानप्रदर्शिनी, शैक्षिकसामग्रीप्रदर्शिनी इत्यादिरूपेण बहुविधाः संस्कृतप्रदर्शिन्यः याः देशे तत्र तत्र आयोज्यन्ते ताः द्रष्टुं जनाः सहस्रशः आगच्छन्ति, प्रेरिताः भवन्ति च। जनजागरणार्थम् एतत् किञ्चन प्रबलं साधनम्।

७. त्रिसहस्राधिकेषु स्थानेषु कार्यारम्भः

ग्रामे ग्रामे विद्यमानाः संस्कृभारत्याः कार्यकर्तारः भारते त्रिसहस्राधिकेषु स्थानेषु संस्कृतसेवाकार्यस्य प्रारम्भं कृतवन्तः सन्ति। देशस्य तादृशम् एकमपि राज्यं नास्ति, यत्र संस्कृतभारत्याः कार्यं न स्यात्। तमिलनाडु-असम-मणिपुरादिषु राज्येषु विशिष्टपरिस्थित्यां सत्यामपि जाता कार्यवृद्धिः विशेषतया उल्लेखार्हा।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

८. संस्कृतवर्षम्

२००० तमं वर्षं संस्कृतवर्षम् इति आचरणीयम् इति १९९२ तमे वर्षे एव निश्चित्य अष्टानां वर्षाणां कार्ययोजना कृता आसीत्। तेन कारणेन, पुनश्च केन्द्रसर्वकारेण संस्कृतवर्षं घोषितम् इत्यस्मात् च तस्मिन् वर्षे देशे बहवः कार्यक्रमाः अभवन्, येन काचित् जागर्तिः सञ्जाता।

९. संस्कृतसप्ताहः

संस्कृतवर्षावसरे एव संस्कृतसप्ताहस्य घोषणा केन्द्रसर्वकारमाध्यमेन कारिता। श्रावणपूर्णिमायाः दिनत्रयात् पूर्वं, दिनत्रयात् अनन्तरं चेति सप्ताहः। इदानीं संस्कृतभारतीमाध्यमेन एव देशे सहस्राधिकेषु स्थानेषु संस्कृतसप्ताहकार्यक्रमाः सवैभवम् आचर्यन्ते।

१०. सरलसंस्कृतशिक्षणकेन्द्राणि

विश्वविद्यालयानुदानायोगद्वारा देशे सहस्राधिकेषु महाविद्यालयेषु वर्षं यावत् निरन्तरं मासात्मकं सरलसंस्कृतशिक्षणकेन्द्राणि प्राचलन्। तन्निमित्तं योजनाकरणं, पाठ्यपुस्तकपाठ्यसामग्रीनिर्माणं, शिक्षकप्रशिक्षणम् इत्यादिकस्य दायित्वं संस्कृतभारत्याः आसीत्।

११. अनौपचारिकशिक्षणकेन्द्राणि

यद्यपि एषा योजना राष्ट्रियसंस्कृतसंस्थानस्य आसीत् तथापि सामग्रीनिर्माणे, शिक्षकप्रशिक्षणे, केन्द्राणाम् आयोजने, पर्यवेक्षणे च संस्कृतभारत्याः भूमिका आसीत्। सर्वकारीयासु योजनासु एषा काचित् प्रभावियोजना इति विख्याता अभवत्। लक्षाधिकाः जनाः संस्कृतं पठितवन्तः। सहस्राधिकानां शिक्षकप्रशिक्षणमपि एतन्निमित्तमेव जातम्।

१२. लक्षशः पुस्तकानां विक्रयणं, कोटिशः रूप्यकाणाम् आयः च

गोरखपुरस्थस्य गीताप्रेस् इत्यस्य पुस्तकानां कोटिशः प्रतिकृतीनां विक्रयणं जातं, जायते च इति सर्वे जानन्ति। संस्कृतभारत्याः अपि 'वदतु संस्कृतम्' 'संस्कृतव्यवहारसाहस्री' इत्यादीनां पुस्तकानां तया एव रीत्या तावता एव परिमाणेन विक्रयणं प्रचलति। संस्कृतक्षेत्रेऽपि एतादृशं वाणिज्यं भवितुम् अर्हति इति संस्कृतभारत्या दर्शितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३. महन्ति सम्मेलनानि, जनसभाः, शोभायात्रा च

बेङ्गलूरू, कुन्दापुर, शिरसि, काशी, देहली इत्यादिषु नगरेषु संस्कृतभारत्या एतादृशानि सम्मेलनानि सभाः च आयोजिताः, यत्र दशसहस्रात् अपि अधिकाः जनाः आसन्। देहल्यां तालकटोरानामके उद्याने १९९४ तमे वर्षे जातायां सभायां पञ्चत्रिंशत्सहस्राधिकाः जनाः आसन्। तेन च संस्कृतमपि जनान्दोलनविषयः इति प्रमाणितं जातम्। देशे सर्वत्र संस्कृतस्य शोभायात्राः बहुधा भवन्ति।

१४. कार्यपद्धतेः विकासः

संस्कृतप्रचारकार्यं कथं करणीयं, तदर्थं कार्यकर्तृणां वर्धनं कथं करणीयम् इति काचित् विशिष्टा कार्यपद्धतिः वर्धिता संस्कृतभारत्या। तया पद्धत्या कार्यं क्रियते चेत्, अनुभवेन प्राप्तेन तेन मार्गेण गम्येत चेत् लक्ष्यप्राप्तिः सुनिश्चिता।

१५. विंशे त्रिंशदधिकेषु देशेषु संस्कृतकार्यप्रवेशः

अमेरिका, केनडा, इङ्गलेण्ड्, गल्फदेशाः इत्यादिषु संस्कृतभारत्याः कार्यं निरन्तरं प्रचलति। त्रिंशदधिकेषु देशेषु संस्कृतभारत्या प्रशिक्षिताः जनाः सन्ति।

१६. ह्रासात् रक्षणम्

महता वेगेन यः संस्कृतस्य ह्रासः प्रचलति स्म तस्य स्थगनं जातम् अस्ति। 'ग्राफ्' इत्यस्मिन् संस्कृतरेखायाः मुखं यत् अधोमुखम् आसीत् तदिदानीम् ऊर्ध्वमुखं जातमस्ति। संस्कृतानुकूलवायुमण्डलस्य प्रारम्भः जातः अस्ति। संख्या, स्तरः चेति उभयोः अपि वृद्धिः जायमाना अस्ति।

१७. जीवनदातारः कार्यकर्तारः

स्वीयं सम्पूर्णं जीवनं संस्कृताय समर्प्य पदधनपदव्याद्याकाङ्क्षाः विना संस्कृतविकासैकचित्ताः सन्तः बहवः सेवाव्रतिनः शताधिकाः संस्कृतभारत्याम् अद्य सन्ति। तथैव सहस्राधिकाः कार्यकर्तारः एतादृशाः सन्ति ये शिक्षकवृत्तिं कुर्वन्तोऽपि सर्वविधानि कष्टानि प्रतिकूलतां च सहमानाः अपि स्वीयं भौतिकोत्कर्षं धनसमृद्धिं च उपेक्षमाणाः अपि अहर्निशं संस्कृतकार्यं कुर्वाणाः संस्कृतजीवनाः सन्ति। एतादृशाः स्थानीयकार्यकर्तारः देशे सर्वत्र सन्ति। तत्रापि युवानः एव आधिक्येन दृश्यन्ते इति तु संस्कृतभारत्या विशेषः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१८. सङ्घटनम्

देशे सर्वेषु राज्येषु पञ्चशताधिकेषु जनपदेषु सार्धद्विसहस्राधिकेषु स्थानेषु प्रसृतं संस्कृतभारत्याः सङ्घटनजालं संस्कृतभारत्याः महत्तमा उपलब्धिः। प्रजाप्रभुत्वे जनशक्तेः द्वारा एव कार्यं भवति इति वयं सर्वे जानीमः एव।

१९. संस्कृतचन्दमामा

पञ्चविंशति वर्षाणि यावत् निरन्तरतया संस्कृतचन्दमामा भाषादोषैः विना सरलसंस्कृतेन प्रकाश्यमाना अस्ति इत्येव संस्कृतबालसाहित्याय कृतं महत् प्रदानम्।

२०. सम्भाषणसन्देशः

चतुर्वर्णमुद्रणोपेतः, आधुनिकविषययुक्तः, देशस्य कोणे कोणे पठ्यमानः सम्भाषणसन्देशः सर्वेषां संस्कृतज्ञानाम् अन्यतमं प्रेरणास्रोतः संस्कृतपत्रकारितायाः चित्रचरित्रपरिवर्तिका च।

२१. संसदि विधानसभासु च सम्भाषणशिबिराणि

चतुरशीतितमे वर्षे संसद्भवने सांसदेभ्यः सञ्जातं संस्कृतसम्भाषणशिबिरं तत्पश्चात् बहूनां राज्यानां विधानसभासु शासकेभ्यः सञ्चालितानि शिबिराणि च जनजागरणे महतीं भूमिकां निरवहन्।

२२. लेखकानां निर्माणम्

सरलसंस्कृतेन लेखकाः बहवः निर्मिताः, निर्मीयमाणाः च सन्ति, येषां द्वारा सद्यः एव संस्कृते नवसाहित्यं महता परिमाणेन सृज्येत।

२३. संवादशाला

देहल्यां या संवादशाला अस्ति तस्यां प्रतिपक्षं नूतनस्य गणस्य सप्ताहद्वयात्मकम् आवासीयम् अल्पशुल्कयुक्तं प्रशिक्षणं दीयते। तत्र संस्कृतसम्भाषणस्य, संस्कृतमाध्यमेन पाठनस्य च बोधनं भवति। तस्य माध्यमेन कतिपयसहस्रजनाः लाभान्विताः अभवन्। एतत् प्रशिक्षणं दिशापरिवर्तकं भवति।

२४. सामाजिकसामरस्यसाधनम्

समाजस्य उपेक्षितवर्गाणां निवासक्षेत्रे ये तावत् सामाजिककारणैः संस्कृतशिक्षणतः दूरे आसन् तादृशेभ्यः बन्धुभ्यः एव विशेषतया संस्कृतकक्षाः चालयते संस्कृतभारत्या। तेन समाजे सर्वेषां परस्परभावैक्यवर्धने महोपकारः भवति। जातिसम्प्रदायभाषा-

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

प्रान्तादिभेदभावनानां निवारणे राष्ट्रैक्यभाववर्धने च संस्कृतं किञ्चन उत्तमं साधनम् इति प्रत्यक्षतः कार्येण प्रमाणितम्।

२५. संस्कृतगृहम्

अद्य देशे कतिपयसहस्रं गृहाणि सन्ति, येषु गृहेषु सर्वदा संस्कृतव्यवहारः भवति, परितः विद्यमानाः जनाः जानन्ति च – तस्मिन् गृहे गृहसदस्याः सर्वे संस्कृतेन भाषन्ते इति। एतेन उपक्रमेण संस्कृतस्य चित्रं परिवर्तमानम् अस्ति।

२६. संस्कृतग्रामाः

केचन ग्रामाः सन्ति, ये संस्कृतभारत्याः प्रयत्नेन संस्कृतग्रामत्वेन प्रख्याताः। अन्ये केचन ग्रामाः सन्ति यत्र सम्पूर्णं ग्रामं संस्कृतग्रामं कर्तुं प्रयत्नः अनवरतं प्रचलति।

२७. सम्प्रेषणविधिः

संस्कृतभारत्याः प्रयत्नस्य कारणतः केन्द्रीयमाध्यमिकशिक्षापरिषदः द्वारा संस्कृतशिक्षणे सम्प्रेषणविधिः आनीतः, यस्य च कारणेन तत्सम्बद्धेषु विद्यालयेषु संस्कृतच्छात्रसंख्या प्रवृद्धा।

२८. गीताशिक्षणकेन्द्रम्

भगवद्गीतामाध्यमेन संस्कृतशिक्षणं, संस्कृतमाध्यमेन गीताशिक्षणमिति उभयलाभोपेतं गीताशिक्षणकेन्द्रपाठ्यक्रमनिर्माणं तादृशिशिक्षणकेन्द्रचालनं च संस्कृतक्षेत्रे महान्तं परिणामं जनयिष्यति।

२९. संस्कृतमातृभाषिपरम्परायाः पुनरुज्जीवनम्

शिशुं जन्मतः संस्कृतभाषया वर्धयित्वा वास्तविकरूपेण तस्य मातृभाषा संस्कृतं यथा स्यात् तथा करणेन अद्य शतशः बालाः निर्मिताः सन्ति, येषां संस्कृतमेव मातृभाषा अस्ति। एषा संख्या भाविनि काले सहस्रशः, लक्षशः च भविष्यति। भाग्यवन्तः खलु ते बालाः येषां मातृभाषा संस्कृतम्।

३०. सर्वेषाम् एकत्र आगमनं, सम्भूय कार्यकरणं च

विश्वसंस्कृतपुस्तकमेला इत्येतस्य कार्यक्रमस्य निमित्तं संस्कृतसम्बद्धाः सर्वाः अपि संस्थाः जनाः च एकत्र आगच्छेयुः, सम्भूय कार्यं कुर्वन्तः भवेयुः च। संस्कृतेतिहासे नवम् अध्यायमेव आरम्भयिष्यति अयं कार्यक्रमः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमेव वास्तविकं सङ्घटनतत्त्वम्। एषा एव जनान्दोलननिर्माणरीतिः। अयं शुभारम्भः। नास्त्यत्र कस्याश्चित् संस्थायाः व्यक्तेः वा प्राधान्यम्। कार्यैकप्राधान्यम् अत्र। नास्ति कस्यचित् जनस्य प्रशंसा, पुरस्कारः, सम्माननं वा। संस्कृतस्यैव पुरस्करणम्। संस्कृतभारती निमित्तमात्रम्। प्रत्येकं कार्यकर्ता उपकरणंमात्रम्।

हे! संस्कृतबान्धवाः, आगम्यताम्, संस्कृतभारतीकार्ये संयुज्यतां, सम्भूय स्थीयतां, संस्कृतयशसे सर्वस्वार्पणं क्रियतां, जन्मसार्थक्यं सम्पाद्यताम्।

अधिकविवरणार्थं दृश्यताम्
www.samskritbookfair.org

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection





CC-0. Nepal Sanskrit Academy. Kathmandu Collection

ISBN - 978-93-[illegible]